# कथा

एकः काकः **अस्ति** ।

तदा ग्रीष्मकालः ।

सः तृषितः **भवति** ।

सः जलस्य अन्वेषणम् **करोति** ।

अत्र **पश्यति** ।

तत्र **पश्यति** ।

सर्वत्र **पश्यति** ।

कुत्रापि जलं एव न **अस्ति** ।

सः सर्वत्र जलार्थं **भ्रमति** ।

काकः कष्टेन सुदूरं **गच्छति** ।

तत्र सः एकं घटं **पश्यति** ।

काकः अतीव सन्तोषः **भवति** ।

किन्तु घटे स्वल्पम् एव जलम् **अस्ति** ।

सः जलं पातुं न **शक्नोति** ।

' जलम् कथं पिबामि ' इति **चिन्तयति** ।

सः एकम् उपायं **चिन्तयति** ।

शिलाखण्डान् **आनयति** ।

घटे **स्थापयति** ।

पुनः बहुशिलाखण्डान् **आनयति** ।

घटे **पूरयति** ।

जलम् उपरि **आगच्छति** ।

काकस्य आनन्दः **भवति** ।

काकः सन्तोषेण जलम् **पिबति** ।

काकः ततः स्वनीडं **गच्छति** ।

सुखेन जीवनं **यापयति** ।

- 0 -

**' चतुरः काकः '**